International Journal of Sanskrit Research 2021; 7(5): 33-37

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 33-37
© 2021 IJSR
www.anantaajournal.com
Received: 26-06-2021
Accepted: 28-08-2021

**Dr. Arundhati Ojha**
संस्कृतविभागाध्यक्षा धरणीधर स्वयंशासितमहाविद्यालयः, केन्दुझरम्, ओडिशा, भारत

**Corresponding Author:**
**Dr. Arundhati Ojha**
संस्कृतविभागाध्यक्षा धरणीधर स्वयंशासितमहाविद्यालयः, केन्दुझरम्, ओडिशा, भारत

# मेघदूतं वाणीदूतञ्च इति विषये समीक्षात्मकमध्ययनम्

**Dr. Arundhati Ojha**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i5a.1466

**प्रस्तावना**

**पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ।। इति मल्लिनाथ।**

संस्कृतप्रसिद्धकविपरम्परायां कालिदासस्य श्रेष्ठत्वं न केवलं टीकाकारेण मल्लिनाथेन स्वीक्रियते अपि तु सम्पूर्णेऽपि विश्वे च सर्वैरपि विद्वद्भिः एकवाक्येन उद्घोष्यते। न केवलं संस्कृतसाहित्ये, अपि तु विश्वसाहित्येऽपि कालिदासस्य तुलना केनापि सह कर्तुं न शक्यते। यद्यपि प्रतियुगं विविधासु भाषासु बहवः प्रसिद्धाः कवयः सञ्जाताः, ते सर्वे स्वक्षेत्रेषु महान्तः ख्यातिमन्तः आसते। ते च सर्वे सम्मानार्दाश्च। स्वक्षेत्रेषु तेषामुदाहरणमपि अस्माभिः दीयते। किन्तु कालिदासः अविरोधिरूपेण 'एकमेवाद्वितीयम्' इति सर्वैः स्वीकृतः। उदयनादयः शास्त्रकाराः, आनन्दवर्द्धन-राजशेखरोटाभट्ट-मम्माटादयः काव्यशास्त्रविदः, मल्लिनाथादयः टीकाकाराः, दण्डी-जयदेव-क्षेमेन्द्रादयः कवयश्च स्वश्लोकेषु कालिदासस्य भूयोभयः प्रशंसां कृतवन्तः। तेषां कालिदासप्रशस्तिः एतावदेव लोकेषु प्रसिद्धाः सन्ति। आनन्दवर्धनेन उक्तं यथा -

**अस्मिन्नतिविचित्रकविपरम्परावाहिनिसंसारे।**
**कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवयः गण्यते ।। इति।**

न केवलं भारतीयविद्वांसः, अपि तु गेटेमहाभागादयः पाश्चात्यविद्वांसोऽपि कालिदासस्य प्रतिभां स्वप्रशस्तिभिः सिञ्चन्ति।

**मेघदूतम् -** सुविस्तृतसंस्कृतकाव्यसंसारे रससिद्धकवीश्वरत्वेन महाकविः कालिदासः नितरां प्रसिद्धः इति विदन्त्येव विद्वांसः। तदीयरचनासु मेघदूतं नाम खण्डकाव्यं दूतकाव्यपरम्परायाः प्रवर्तकमिति प्रतिभाति। अयं महाकविः पुराणेतिहासेभ्यः कथावस्तु संगृह्य रघुवंशादिकाव्यकदम्बरचनायां सुनिपुणः। मेघदूतस्य उत्स्यसन्धानेऽपि अस्य प्रभावः परिदृश्यते।

**दूतपरम्परा -** काव्ये संदेशप्रेषणस्य परम्परा पुराणेषु विशेषत: रामायणे महाभारते युधिष्ठिरेण सन्धिप्रस्तावनिमित्तं दुर्योधनं प्रति श्रीकृष्णमाध्यमेन वार्ता प्रेरिता अस्ति । कालिदास: रामायणाधारेण मेघदूतं प्रणीतवान् इति तथ्यं मेघदूतेऽपि सूचितम् । यथा - **"**इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा**"**[1] इत्यादि: वाल्मीकिना वर्णितं हनुमत: दौत्यं कालिदासेन चमत्काररीत्या समुपस्थापितम् । रामायणे सीतां सन्तोषयितुं धैर्य धारयितुं च बाल्मीकिना वर्णितम् -

**कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।**
**एति जीवन्तमानन्दो नरं वर्षशतादपि ।।**[2] **इति ।**

अयमेवार्थ: कालिदासेन स्फुटतया व्यज्यते -

**नत्यात्मानं बहु विगणयन्नात्मनैवावलम्वे**
**तत्कल्याणि त्वमपि सुतरां मा गम: कातरत्वम् ।**
**कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा**
**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।।**[3] **इति ।**

**भौगोलिकविवरणम् -** मेघदूते प्रकृत्या साकं मानवचेतनाया: सुमधुर: समन्वयः दृश्यते। किं बहुना ? अचेतनवस्तु सचेतनवद्वर्णनेन निपुण: महाकवि: लोकशिक्षणार्थं तदनुकूलं पदविन्यासं विदधाति। तत्र यक्षह्रदयस्य विरहवेदना भौगोलिकविवरणञ्च सरसरूपेण कविना प्रतिपाद्यते। मेघदूतस्य वर्णनानुसारं मेघ: रामगिरित: यात्रारम्भ्य अलकापुरीं प्रति गच्छति । तत्र विन्ध्यपर्वत-मालक्षेत्र-आम्रकुट-रेवातीर्थ-उज्जयिनी-देवगिरि-क्रौञ्चरन्ध्रपर्वतादिद्वारा हंसद्वार- मार्गेण विद्यमानमलकापुरीं प्रति मेघ: प्रयाति । मेघमार्गे आविन्ध्यहिमाचलं किञ्चित चित्रं प्रकल्पितमस्ति । भारतवर्षस्य विभिन्नतीर्थक्षेत्राणां नदी-पर्वतादीनां च भौगोलिकसौन्दर्यं, जनानां चरित्रं स्थानमाहात्म्यं च अत्र यक्षमुखेन कालिदासेन वर्णितम् ।

**उपमाप्रयोगः तथाच अलंकारशैली -** एतादृशः कालिदासः साक्षात् कालीसरस्वत्याः वरपुत्रः इव बहुप्रतिभाणाञ्च अधिकारी अस्ति । प्रकृतिवर्णनं चरित्रचित्रणम्, अलङ्कारयोजनं, छन्दप्रयोगः, मनस्तत्त्वविश्लेषणञ्च इत्यादीनि सर्वाणि काव्यगतवैशिष्ट्यानि कालिदासस्य लेखन्यां स्वस्वोत्कर्षस्य पराकाष्ठां प्राप्नुवन्ति। एतेषां मध्ये कालिदासस्य उपमाप्रयोगनैपण्यं बहुचर्चितमस्ति। अस्मिन् विषये - "उपमा कालिदासस्य" इत्यादि उक्तिः प्रसिद्धा: सन्ति। यद्यपि सर्वेषु शब्दालङ्कारेषु अर्थालंकारेषु च कालिदासस्य प्रतिभास्पर्श: विद्यते, तथापि तन्मध्ये उपमाप्रयोगस्य किञ्चिद्वैशिष्ट्यमस्ति ।

अत्र उपमाशब्देन केवलं पारिभाषिक: उपमालङ्कार: न बोध्यते। अपितु, उपमा दृष्टान्तार्थान्तरन्यासोत्प्रेक्षातिशयोक्त्यादयः पालकाअर्थालङ्कारा: स्वीक्रियन्ते । काव्यशास्त्रवित्सु अधिकांशै: रसमेव काव्यस्यात्मा इति स्वीक्रियते। माधुर्यादयः गुणाः रसस्य उपकारका: भवन्ति । शब्दालङ्कारा: अर्थालङ्काराश्च रसस्य बाह्यालङ्कारसदृशाः । उत्तमकाव्ये रसनिष्ठव्यञ्जना एव प्रधानं भवति। तत्र अलङ्कारयोजनं वैकल्पिकं भवति । परन्तु कालिदासस्य काव्ये अलङ्कारा: कृतिमाभूषणरूपेण न अपि तु रसस्य उपकारकाकाः भावग्राह्याश्च भवन्ति। तत्र अलङ्कार: पाण्डित्यग्राहक: भारवाही न, अपि तु रसग्राहकः, भावग्राहक: रसास्वादजनकश्च अस्ति । ते काव्यगतं स्वाभाविकमाधुर्यमेव प्रकाशयन्ति । कालिदासः स्वभावकविः अस्ति । तस्य काव्ये छन्दालंकारयोजनं, पदप्रयोग: इत्यादय: सर्वे रसानुगता: भवन्ति । उपमा तत्र कवे: भावं क्लिष्टं न करोति । उपमा तत्र कविहृदयादुत्सारितभावानुसारेण स्वतः प्रयुक्ता भवति, न तु पुन: कविना परिश्रमेण प्रयुज्यते । अत: अलङ्कार: कालिदासस्य काव्ये तस्य स्वाभाविकं सौन्दर्यं प्राप्नोति। तेषां मध्येऽपि उपमा तत्र अधिका मनोहरा वर्तते ।

**मेघदूतमवलम्ब्य दृष्टान्तवर्णनम् -** उपमा अत्र आचेतनप्रकृतिमपि चेतनवत् दर्शयति। तत्र मेघदूतस्य प्रसिद्धानि श्लोकानि आश्रित्य कालिदासस्य उपमानैपुण्यं वर्णितुं शक्यते - भर्तुः कुबेरस्य शापेण प्रियावियुक्त: निर्वासित: यक्षः स्वकर्तव्यैः प्रमोदवशाद यदा रामगिरिपर्वतस्य आश्रमेषु भ्राम्यमान: विरहदशाया: असहनीयदिनानि यापयन् आसीत्, तस्मिन् समये आषाढस्य प्रथमदिवसे सः पर्वतशिखरे मेघं दृष्टवान् । कथामासीत् स: मेघ: ? कवि: वर्णयति- **'वप्रक्रीडापरिणतगजप्रेक्षणीयम्**[4] इति। वप्रस्य क्रीडासु परिणत: य: गज: तमिव प्रेक्षणीय: दर्शनीयः इति भावः । अर्थात्, वप्रक्रीडासक्तगजवत् स: मेघ: पर्वतशिखरमालिङ्गय अतिष्ठत्। अत्र कविना लुप्तोपमायाः प्रयोगः क्रियते । पुन: मेघमार्गवर्णनसन्दर्भे कवि: एकस्मिन्

श्लोके वर्णयति - पद्मरागादिमणि-कान्तिमिश्रणमिव वर्णनीयमेतत् इन्द्रस्य पुरत: दृश्यमानं धनु खण्डं बाल्मीकाग्रात् प्रभवति । तत्प्रभासम्पत्तिव श्यामवर्णं शरीरं तथैव अतिशोभां लप्स्यते यथा देदीप्यमान दीप्तिमता पिच्छेन गोपवेशस्य विष्णो: श्याम वपुरतितरां शोभामाधते । श्लोकं यथा

**रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्तात्**
**वल्मीकाग्रात्प्रभवति धनुः खण्डमाखण्डलस्य ।**
**येन श्यामं वपुरतितरां कान्तिशापत्स्यते ते**
**वर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ।।**[5]

प्रस्तुते श्लोके उपमालङ्कारमाध्यमेन कवि: इन्द्रधनुरालोके मेघस्य अतिमनोहरां शोभां प्रतिपादितवान् । अलङ्कारः अत्र रसग्राहकः, भावव्यञ्जकश्च वर्तते । पुन: उपमासमासोक्तियुगलेन कवि: आम्रकूटेन सह मेघमेलनकारणेन जातं सौन्दर्यं वर्णयति -

**रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णा,**
**भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ।।**[6]

तथैव -

**छन्नापान्तः परिणतफलद्योतिभिः काननानै**
**स्त्वयारूढे शिखरमचल: स्निग्धवेणीसवर्णे ।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां,**
**मध्ये श्याम: स्तन इव भुवः शेषविस्तारपाण्डुः ।।**[7]

प्रस्तुते श्लोके **'भुव: स्तन: इव'** इत्यत्र उत्प्रेक्षालङ्कारेण तथा च **'स्निग्धवेणी-सवर्णे'** इत्यस्य उपमालंकारेण कविः माधुर्यमण्डितं प्रकृतिचित्रणं कृतवान् । पुन:-

**नीचै सख्यं गिरिमधिवसेस्तत्र विश्रामहेतो**
**स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः ।।**[8]

**त्वत्सम्पत्तिपलकितमिव'** इत्यत्र उत्प्रेक्षालङ्कारेण मेघसम्पर्कात् कदम्बपुष्पोदगमेन क्रियते। एकस्मिन् स्थाने समासोक्त्या लिङ्गसाम्यात् कविना निर्विन्ध्या नद्यां नायिकाभाव: मेघे च नायकव्या श्लोकं यथा

**वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धु:**
**पाण्डुच्छाया तदरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।**
**सौभाग्यं ते सुभग विरहावस्थाया व्यञ्जयन्ती**
**कार्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ।।**[9]

कालिदासस्य अर्थान्तरन्यासः अपि किञ्चित् विशिष्ट: वर्तते । अर्थान्तिरन्यासेन कवि: कुत्रचिद् विरहीहृदयाना समर्थनं कृतवान्, कुत्रचिद् दातृ-ग्रहीतृणां सम्बन्धमपि प्रतिपादितवान् । तत्र दृष्टान्तम्

**मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः ।**
**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।।**[10]

पुनश्च

**कामार्ता हि प्रकृतिकृपणाश्चेतनाश्चेतनेषु ।।**[11]

तथैव

**याच्ञा मेघा वरमधिगुणे नाधमे लब्धकामा ।।**[12]

कालिदासस्य अर्थान्तरन्यासप्रसङ्गे केनचित् कविना उच्यते -

**उपमा कालिदासस्य नोत्कृष्टेति मतं मम ।**
**अर्थान्तरविन्यासे कालिदासो विशिष्यते ।।** इति।

कालिदासस्य अर्थान्तरन्यासप्रयोगा: अद्यापि प्रसिद्धसूक्तिरूपेण लोके विराजिताः ।

**वाणीदूतम्** - महाकविकालिदासस्य पदाङ्कमनुसृत्य परवर्तिकालेषु बहुनि खण्डकाव्यानि विरचितानि। धोयीकविना कृतं पवनदूतम् । वैष्णवकविना भेङ्कटनास्य हंससंदेशम्, रूपगोस्वामिमहोदयस्य हंससंदेश-हंसदूतञ्च तेषु अन्यतमम् । विंशशतकस्य बङ्गीय कविवरेण लक्ष्मीकान्तपञ्चतीर्थमहोदयेन विरचितं वाणीदूतम् अपि खण्डकाव्यजगति उल्लेखयोग्यम् । खण्डकाव्यं नाम काव्यस्य एकदेशानुसारी । कालिदासीयमेघदूते यथा - यथैव मनुष्यजीवनस्य चिरन्तन: विरह: यक्षजीवनस्य आधारेण रचितः लक्ष्मीकान्तकवे: वाणीदूतं तथैव परकीर्तिम् असहमानानां घृण्याचरणम् आश्रित्य विरचितम् । अत्रापि मानवमनसः चिरन्तन दुःखं मन्दाक्रान्ताछन्दसा अलंकारेण च समृद्धं सत् कविवरेण विवृतम् ।

मन्दाक्रान्ताबहुलै: श्लोकै: रचितं खण्डकाव्यमिदं कवे: कर्मजीवनस्य आत्मसाक्ष्यं प्रददाति । परप्ररोचनया

वृत्तित्यक्तः संस्कृतपण्डितोऽयं स्वमनोव्यथां काव्यरूपेण प्रस्तौति उच्चाधिकारिणां समक्षम् । काव्यप्रयोजनमत्र वृत्तिकृते अर्थकृते वा सिद्धमस्ति ।

**कश्चिद्विप्रः प्रकृतिसरलोऽध्यापनामात्रजीवी**
**मिथ्यादोषैर्बुधपरिषदा दुर्विधो रुद्धवृत्तिः ।**
**आविर्भूतां ह्रदयकमलादेकदालोक्य वाणीं**
**वाष्पाम्भोभिर्वरिवसितवान् क्षालयंस्तत् पदाब्जम् ।।**[13]

**समाजचित्रम्** - समकालीनसमाजस्य भ्रष्टं चित्रमपि सम्यक निरूपितं कविना -

**विन्यस्यन्तः कतिचिदनया लोकनेक्षेषु धुलिं**
**भ्रष्टाचारा अपि सदसि ये तन्वते वाक्यजालम् ।**
**अन्याक्षेपैः स्वकृतकलुषं तावदाच्छादयन्ते**
**विद्वंमन्याश्चतुरमतयो वृत्तिभाजः पुनस्ते ।।**[14]

काव्यस्यान्ते सुखान्तं वृत्तिलाभफलं समुपदिशति कविरयम् –

**अतः परं यद् घटितं तदुच्यते मया धृता स्वकरेण लेखनी ।**
**तया कृता दूतकपुस्तकाबली सदस्यवृन्दाय मया समर्पता ।।**[15]

लक्ष्मीकान्तब्राह्मणेन प्रणीतं वाणीदूतं खण्डकाव्यं प्रसेव्य ।

**लब्धानन्दैः संसदः सभ्यवृन्दैः वृत्तिस्तस्मै शिक्षकाय प्रदत्ता ।।**[16]

**अलंकारप्रयोगः** - मरालैः सह बङ्गबालामुपाम्नोति कविः -

**चन्द्रायन्ते विशदरूचिभिर्बद्धमाला मराला**
**हंसायन्ते ललितगतिभिः सत्पथे बङ्गबालाः ।**
**कान्तायन्ते शिशिरचरितैः जीवनाधारवारि**
**वारीयन्ते विमलकृतिभिः शारदाकाशमम्ब ।।**[17]

एवमेव काव्यमिदं कवेमौलिकरचनाकौशलं विशदयति, प्रकाशयति च तत्काव्यालोकं, प्रगुणीकरोति दूतकाव्यपरम्पराम् ।

**समीक्षा** - कालिदासस्य मेघदूतं पौराणिकमाख्यानमवलम्ब्य काव्यचमत्कारत्वेन च कवेः सत्भावानुगुणं रचितं वर्तते । तत्र काव्ये प्रधानरूपेण यक्ष-यक्षप्रिययोः विरहवेदना मानवस्य अन्तर्मन चिरं प्लावयति । वाणीदूतमपि आधुनिकबङ्गीय काव्यधारायां दूतपरम्परायाः साक्षरं बहति । तत्र काव्ये भीतवृत्तिः कविः लक्ष्मीकान्तः कर्महीनतायाः दुःखं सकीयदारिद्र्यञ्च काव्यमाध्यमेन वर्णयति। अत्र मुख्यमस्ति यत् वाणीदूतं सत्यघटनाधारेण रचितं वर्त्तते। कालिदासेन वर्णितेन मेघस्य द्यौत्येन प्रभावित सन् आधुनिक कविः तस्य वाणीदूते देवीं सरस्वतीं किं वा कवि भारतीं दूतरूपेण विद्यत्परिषदसमीपे प्रेषयति। मेघदूते प्रधानरूपेण रामगिरितः अलकापुरीं पर्यन्तम् आविन्धहिमाचलस्य भौगोलिकविवरणं तेषां चित्ताकर्षजनजीवनं, स्थानमाहात्म्यं, यक्षप्रियायाः विरहवर्णना अस्माभिः प्राप्यते । यतः वाणीदूतम् आधुनिककाव्य परम्परायाः वार्तावाहकम्, तस्मात् अत्र काव्यसरस्वत्याः माध्यमेन कविना वास्तवसमाजचित्रम्, तस्य कठिनं कोठरं दुर्नीतिपरायणरूपम्, दारिद्रस्य असहनीयवेदना इत्यादयोः विषयाः सम्यग्रूपेण सरलया सरसतया च उपस्थाप्यते। मेघदूतं वाणीदूतं च उभयमपि काव्यं काव्यस्वरूपदृष्ट्या खण्डकाव्यात्मकम्, एकं मनुष्यजीवनस्य चिरन्तनविरहगीतं श्रावयति अपरञ्च आधुनिकजीवनमाश्रित्य तस्य आधारेण सामाजिकस्थितिं वर्णयति । उभयमपि काव्यं स्व स्व शैल्यानुगुणं सुन्दरं, सार्थकं, सिद्धप्रयोजनमिति वक्तुं शक्यते ।

## सन्दर्भसूची


1. कालिदास अपनी वात - आचार्य रेवाप्रसादद्विवेदी
2. कालिदास एक साहित्यिक मूल्याङ्कन - डॉ. मञ्जुला गुप्ता, अभिषेकप्रकाशन, दिल्ली
3. संस्कृतसाहित्ये पश्चिमबङ्गस्यावदानम् - डॉ. नारायणदाश :- कथाभारती, कलकाता
4. कालिदास की कला और संस्कृति - डॉ देवीदत्त शर्मा
5. कालिदाससंस्कृतं मेघदूतम् - प्राध्यापकः श्रीराधामोहनमहापात्रः
6. बाणीदूतम् - पण्डितलक्ष्मीकीन्तपञ्चतीर्थः - अमृतलोक साहित्य परिषद


## पादटिप्पण्य

**1.** उ.मे. – ४२

**2.** रामा. - ५.३४.६

**3.** उ.मे - ५२

**4.** पूर्व मे - २

5. पूर्व मे - १५
6. पूर्व मे - १७
7. पूर्व मे – १८
8. पूर्व मे - २६
9. पुर्व मे - ३०
10. पूर्व मे - ३
11. पूर्व मे - ५
12. पूर्व मे - ६
13. वाणी.दू- १
14. वाणी.दू - ३७
15. वाणी.दू- ४७
16. वाणी.दू – ४८
17. वाणी.दू-१७